Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ वाडवानलमन्त्रः —

भास्कर ऋषिः । मति (अति) छन्दः । वाडवानलो देवता । रं बीजम् । स्वाहा शक्तिः । अभीष्टसिद्ध्यर्थे विनियोगः । रां इत्यादिना करन्यासः । तेनैव षडङ्गं च । ध्यानम् —

त्रिनयनमरुणं त्वां बद्धमौलिं सुशुक्लां-
शुकमरुणमनेकाकल्पमम्भोजसंस्थम् ।
अभिमतवरशक्तिस्वस्तिकाभीतिहस्तं
नमत कनकमालालंकृताङ्गं कृशानुम् ॥

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः । इति मन्त्रः ॥

पञ्चाष्टकोणेषु यथाक्रमेण वैश्वानरं मन्त्रमथो लिखित्वा ।
रेखाग्रशूलं च तदग्रसाध्यं तारावृतं वाडववह्निचक्रम् ॥

एतद्यन्त्रं समालिख्य लोहे ताम्रेथ सीसके ।
आवाह्य पूजयेद्वह्निमाग्नेयादि(भि)मुखोम्बिके ॥

पञ्चाष्टकोष्ठं चत्वारिंशत्कोष्ठम् । त्वमग्ने द्युभिरित्यादिवर्णचत्वारिंशं क्रमेण विलिखेत् ॥ शत्रुवस्त्रन् संहराग्ने [1]त्वं तद्देहं दह सत्वरं फट् स्वाहा ॥ इति मन्त्रः ॥

[2]अनेनैतद्यन्त्रं तु सपल्लवं जपेन्नूनमष्टोत्तरसहस्रकम् ।
तत्क्षणाद्वैरिवेश्मानि निर्दग्धानि भवन्ति हि ॥

मन्त्रान्ते हुंफडादितत्तत्क्रियोचितपदयोजनं पल्लव इत्युच्यते ।

---

[1] भापय भापय स्वाहा इति ख, ग, ङ मातृकापाठः ।

त्वं तद्देहं दह इति ख, ग, ङ, मातृकापाठः ।

तत्पश्चादुपसंहारः कर्तव्यश्च वरानने ।

तदर्थं मन्त्रः । सविता ऋषिः । अत्यष्टिः छन्दः । अग्निर्देवता । ॠं बीजम् । स्वाहा शक्तिः । उपसंहारे विनियोगः । मन्त्रस्य पादैः पूर्वोत्तरार्धैश्च करन्यासाङ्गन्यासानि कुर्यात् ॥ ध्यानम् —

सशराय सशार्ङ्गाय शक्तिहस्ताय वह्नये ।
कलापिने नमस्तुभ्यं मत्पापं दह मुञ्च तम् ॥

ओं भूर्भुवःस्वः ।

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
अर्कस्त्रिधातू रजसो विमानो जस्रो घर्मो हविरस्मि नाम ॥

भूर्भुवस्स्वरों मत्पापं दह मुञ्च तं स्वाहा ॥

जप्त्वेत्यष्टोत्तरशतं ब्राह्मणान् भोजयेत्ततः ।

अथाग्नेयास्त्रमन्त्रः —

परब्रह्म ऋषिः । देवीगायत्री छन्दः । बडबामुखाग्निर्देवता । ओं बीजम् । व्याहृतिश्शक्तिः । इष्टसिद्ध्यर्थे विनियोगः । प्रणवपूर्विकाभिरनुलोमविलोमिताभिः पादशो गायत्रीभिः करन्यासाङ्गन्यासौ ॥ ध्यानम्—

बाणाग्रकोणस्थितमेधमानं परान्दहन्तं स्वमरीचिकोणैः ।
शोणाम्बरं चन्द्रकलावतंसं नमामि देवं बडबामुखाग्निम् ॥

शोचिष्केशाय विद्महे वैश्वानराय धीमहि ।
तन्नश्शुक्रः प्रचोदयात् ॥ इति मन्त्रः ॥

त्रिकोणे वह्निबीजं च वसुकोणेऽस्त्रमन्त्रकम् ।
पदशो बाह्यके साध्यं प्राणमावाह्य पावकम् ॥

मनसा तरसा साध्यं पश्चादस्त्रमनुं जपेत् ।

वसुकोणमष्टकोणम् ॥

---

सपल्लवं मन्त्रमेनं जपेदष्टसहस्रकम् । इति युक्तः पाठः ।

वसायाः मालाकारत्वमनुपपन्नम् । अतः वसायुक्त आन्त्रादिमालायुक्तमिति वा भावो बोध्यः ।